# श्रीराम रक्षा स्तोत्रम्

अथ ध्यानम् ।

ध्याये दाजानुबाहुं धृतशर धनुषं बद्ध पद्मासनस्थं
पीतं वासो वसानं नव कमलदल स्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढ सीता मुख कमल मिलल्लोचनं नीरदाभं
नानालङ्कार दीप्तं दधत मुरुजटा मण्डनं रामचन्द्रम् ॥

अथ स्तोत्रं ।

चरितं रघुनाथस्य शतकोटि प्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातक नाशनम् ॥ १॥

ध्यात्वा नीलोत्पल श्यामं रामं राजीव लोचनम् ।
जानकी लक्ष्मणोपेतं जटामुकुट मण्डितम् ॥ २॥

सासितूण धनुर्बाण पाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुं आविर्भूत मजं विभुम् ॥ ३॥

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥ ४॥

कौसल्येयो दृशौ पातु विश्वामित्र प्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रि वत्सलः ॥ ५॥

जिह्वां विद्यानिधिः पातु कण्ठं भरत वन्दितः ।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेश कार्मुकः ॥ ६॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बव दाश्रयः ॥ ७॥

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षः कुल विनाशकृत् ॥ ८॥

जानुनी सेतुकृत्पातु जङ्घे दशमुखान्तकः ।
पादौ बिभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ ९॥

एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ १०॥

पाताल भूतल व्योम चारिणश्छद्म चारिणः ।

न द्रष्टुमपि शक्तास्ते रक्षितं राम नामभिः ॥ ११॥

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैः भुक्तिं मुक्तिं च विन्दति ॥ १२॥

जगज्जैत्रैक मन्त्रेण रामनाम्ना भिरक्षितम् ।
यः कण्ठे धारयेत्तस्य करस्थाः सर्व सिद्धयः ॥ १३॥

वज्र पञ्जरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जय मङ्गलम् ॥ १४॥

आदिष्टवान् यथा स्वप्ने रामरक्षा मिमां हरः ।
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः ॥ १५॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिराम स्त्रिलोकानां रामः श्रीमान् स नः प्रभुः ॥ १६॥

तरुणौ रूप सम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीक विशालाक्षौ चीरकृष्णा जिनाम्बरौ ॥ १७॥

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षः कुल निहन्तारौ त्रायेतां नो रघूत्तमौ ॥ १९॥

आत्त सज्ज धनुषा विषुस्पृशा वक्ष याशुग निषङ्ग सङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणौ अग्रतः पथि सदैव गच्छताम् ॥ २०॥

सन्नद्धः कवची खड्गी चापबाण धरो युवा ।
गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः ॥ २१॥

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥ २२॥

वेदान्त वेद्यो यज्ञेशः पुराण पुरुषोत्तमः ।
जानकी वल्लभः श्रीमान् अप्रमेय पराक्रमः ॥ २३॥

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥ २४॥

रामं दूर्वादल श्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभि र्दिव्यैः न ते संसारिणो नराः ॥ २५॥

रामं लक्ष्मण पूर्वजं रघुवरं सीतापतिं सुन्दरम् ।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथ तनयं श्यामलं शान्त मूर्तिम् ।
वन्दे लोकाभिरामं रघुकुल तिलकं राघवं रावणारिम् ॥ २६॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ २७॥

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥ २८॥

श्रीरामचन्द्र चरणौ मनसा स्मरामि
श्रीरामचन्द्र चरणौ वचसा गृणामि ।
श्रीरामचन्द्र चरणौ शिरसा नमामि

श्रीरामचन्द्र चरणौ शरणं प्रपद्ये ॥ २९॥

माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः ।
सर्वस्वं मे रामचन्द्रो दयालुः
नान्यं जाने नैव जाने न जाने ॥ ३०॥

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा ।
पुरतो मारुति र्यस्य तं वन्दे रघुनन्दनम् ॥ ३१॥

लोकाभिरामं रणरङ्ग धीरं राजीव नेत्रं रघुवंश नाथम् ।
कारुण्य रूपं करुणाकरं तं श्रीरामचन्द्रम् शरणं प्रपद्ये ॥ ३२॥

मनोजवं मारुत तुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानर यूथ मुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥ ३३॥

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविता शाखां वन्दे वाल्मीकि कोकिलम् ॥ ३४॥

आपदा मपहर्तारं दातारं सर्व सम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५॥

भर्जनं भवबीजानां अर्जनं सुख सम्पदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३६॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचर चमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ३७॥

राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ३८॥

इति श्रीबुधकौशिक विरचितं श्रीराम रक्षा स्तोत्रं सम्पूर्णम् ॥

॥ श्रीसीतारामचन्द्रार्पणमस्तु ॥